प्रज्ञां यतः प्राप्य कृतप्रतिज्ञं स्पर्द्धान्विधत्ते प्रसभं प्रतिज्ञम् ।
अज्ञोऽपि तं श्रीशिवनामधेयङ्गुरूपमं स्वीयगुरुंभजेऽहम् ॥ १ ॥

जिस गुरु से ज्ञान को प्राप्त कर अज्ञ भी हठात् विद्वज्जनों से कृतप्रतिज्ञ होकर स्पर्द्धा करता है बृहस्पति के समान उस शिवनामक अपने गुरु को मैं प्रणाम करता हूँ या स्मरण करता हूँ ॥ १ ॥

अथाऽनवद्यामल पद्यपादैः श्रीमन्नृसिंहोत्थ दिवाकरेण ।
प्रकाश्यते सन्मकरन्दसूक्तिसरोजमानम्य गुरुं शिवाख्यम् ॥ २ ॥

अपने शिव नामक गुरु को प्रणाम कर अपने सुन्दर एवं निर्मल पद्यपादों से श्रीमान् नृसिंह दैवज्ञ सुत दिवाकर के द्वारा मकरन्द के सुन्दर उक्ति रूपी कमलों को प्रकाशित किया जाता है ॥ २ ॥

श्रीमच्छिवात्समधिगम्यवरप्रसादं वृत्तांशुभिर्विवरणाभिनवारविन्दम् ।
एतद्दिवाकरविकाशितमार्य्यवर्य्यभृङ्गाः पिबन्तु मकरन्दपिपासवो—ये ॥ ३ ॥

श्री शिव से वर का प्रसाद प्राप्त करके अपने वृत्तरूपी किरणों के द्वारा दिवाकर से विकाशित विवरण नामक अभिनव अरविन्द के मकरन्द का पान श्रेष्ठ पुरुष रूपी भ्रमर जन करें ॥ ३ ॥

पृष्ठस्थितासन्नशकोनितेष्ट शकावशेषप्रमकोष्ठकस्थम् ।
तिथ्यादिवारादिसवल्लिकन्तद्योज्यं समीपस्थशकस्य कन्दे ॥ ४ ॥
खरामा ३० हिचक्रन्तिथेस्सम्प्रदिष्टं भमृक्षस्य योगस्य भं २७ सप्त ७ वारे ।
खतर्का ६० हि चक्रन्तथा बल्लिकायास्तथा कन्दचक्रम्बियत्तर्क ६० भक्तम् ॥ ५ ॥

पीछे के आसन्न शकाब्द में इष्ट शब्द को घटा देने पर शेष सम्बन्धी तिथ्यादि वारादिवल्ली के साथ समीपस्थ कोष्टक के कन्द में जोड़ना चाहिए। तिथि का चक्र ३०, नक्षत्र और योग का २७, वार का ७ तथा वल्ली और कन्द का चक्र संख्या ६० विभाजित है ॥ ४, ५ ॥

नत्वा गजाननं देवं विश्वनाथः करोत्यसौ ।
उदाहरणमुदानम्मकरन्दस्य यत्नतः ॥ १ ॥

प्रज्ञां यतः प्राप्येति, अथानवद्यामिति, श्रीमच्छिवादिति, स्पष्टार्थानि पद्यानि उपरि लिखितानि ॥ अथ पञ्चाङ्गसाधनन्तत्रादौ तिथिसाधनम्। तत्रापि—अभीष्टवर्षादिजतिथिवारादिसाधनमाह। पृष्ठस्थितासन्नेति। इष्टशकमध्ये पुस्तकीयशकः शोध्यः। स यथा—पुस्तकीयशकपंक्ताविष्टशकासन्नो यो न्यूनः शको भवति स तावच्छोध्यो यावदग्रिमपुस्तकीयशकतुल्यो भवति तदनन्तरं द्वयोस्तुल्यशकयोर्मध्ये पुस्तकीयशकापेक्षया एकाधिको भूत्वा यदैकोऽग्रे गच्छति तदा स न शोध्यः। यस्तुल्यो जातः संशोध्यः।

उदाहरणम्—

इष्टशकः १५५१ एतन्मध्ये १५४४ पुस्तकीयशकस्तावच्छोध्यः यावदग्रिमपुस्तकीयशकः १५६० तुल्यो भवति। तदनन्तरम्—इष्टशकः १५६१ मध्ये-अयं १५६० पुस्तकीयशकः शोध्यः यावदग्रिमपुस्तकीयशकः १५७६ तुल्यो भवति। एवमग्रेपि। ननु पुस्तकीये १५६० इष्टशकयोस्तुल्यतायमिष्टशकमध्ये १५६० पुस्तकीयशकः १५६० शुध्यत्येव। इत्थंसति पूर्वशकः १५४४ शोध्य इति किमर्थमुक्तमिति चेदुच्यते तत्र कारणम्। पुस्तकीयशकपंक्तौ एकमारभ्य षोडशशेषाणि सन्ति। इतिकारणात् शकद्वयतुल्यतायामयमेवशोध्य इत्युक्तम्। एवं कृतषोडशषेशाणि सन्ति। अतएव पुस्तकीयशकपंक्तौ परस्परषोडशान्तरं तिष्ठति यदि तुल्ययोः पुस्तकीयेष्टशकयोरन्तरंक्रियते तदा कापि क्षतिर्नास्ति। परन्तु एतावान् विशेषः। यदा पुस्तकीयशकादधःस्थतिथिवारादिकं स्थाप्यं तदधस्स्था वल्ली स्थाप्या द्वयोस्तुल्यशकयोरन्तरे शेषं शून्यमवशिष्यते तर्हि शेषपंक्तौ शून्यकोष्ठको नास्तिइतिकारणात् शकादधःस्थमेव वर्षादौ तिथ्यादिकं भवति। इदंपूर्वप्रकारेण सहतुल्यम्। तद्यथा :—

इष्टशकः १५६० एतन्मध्ये पुस्तकीयशके १५४४ शोधिते शेषं १६ पुस्तकीयशकादधःस्थंतिथ्यादिकं२७।५।२६।४५ वल्ली ५४।३६।३४। शेषादधःस्थतिथ्यादिकं २७।६।६।१२ वल्ली ४।३०।१७ अनयोर्योगेजातंवर्षादौतिथ्यादिकं २४।४।३२।५७ वल्ली ० ६।५१ अथवा इष्टशकः १५६० एतन्मध्ये अयं पुस्तकीयः शकः १५६० शुद्धः शेष० पुस्तकीयशकादधस्थतिथ्यादिकं २४।४।३२।५७ वल्ली ०।६।५१ शेषपंक्तौ शून्यकोष्ठकस्याभावाज्जातं वर्षादौ तिथ्यादिकंपूर्वतुल्यमेव। एवमिष्टशकमध्ये पुस्तकीयशकेशुद्धेयच्छेषं भवति तत्प्रमितकोष्ठकादधःस्थं तिथ्यादिकंस्थाप्यं वल्ली चस्थाप्या। एतन्मध्ये पुस्तकीयशकादधःस्थतिथ्यादिकंयोज्यंवल्ल्यांवल्लीर्योज्या तद्यथा—तिथिस्थाने तिथिर्योज्या। वारस्थानेवारो योज्यः। घटीषु घटीयोज्या पलेषु पलानि। ततः पलस्थाने षष्टिभक्तेसति फलं घटीषु योज्यं घटीषु षष्टिभक्तासु फलं वारे योज्यं। वारेषु सप्ततष्टेषु शेषमितोरव्यादि वारोज्ञेयः अत्र लब्धत्यागः। एवंवर्षादौ वारो भवति। अस्मिन्मकरन्दे सर्वत्र वर्तमानोवारोज्ञेयः। तिथिस्त्रिंशत्तष्टाशेषावर्षादौतिथिर्भवति। अस्यैवनामान्तरं शुद्धिः। वल्याऊर्ध्वाङ्कः षष्ट्याधिकं षष्टितष्टः शेषावर्षादौ वल्ली भवति। तदनन्तरं अग्मिन्वारादौ देशान्तरसंस्कृतिः कार्या तद्यथा :—

रेखास्वदेशान्तरयोजनघ्नीगतिर्ग्रहस्याभ्रगजैर्विभक्ता ।
लब्धाविलिप्ताः खचरेविधेयाः स्वर्णंपरेप्राक्समयेविलोममिति ।

यानि देशान्तरयोजनानि रविमध्यंगत्या गुणितानि कार्या०। पश्चादशीत्याभक्त्वालब्धपलानि

वारादिपलस्थाने रहित सहितानि कार्याणि यदाग्रहे ऋणानि तदा धनानि यदा धनानि तदा ऋणानि तिथिनक्षत्रयोगसंक्रान्तिमहानक्षत्रेषु ग्रहापेक्षया विपरीतमित्युक्तत्वात्।

उदाहरणम्—काश्यां देशान्तरयोजन ६४ ऋणानि सूर्यगत्या ५९।८ गुणितानि ३७८४ अशी–८० त्या भक्तानि लब्धपलानि ४७ ऋणानि देशान्तरस्य ऋणसंज्ञकत्वात्, तिथौ विपरीतमित्युक्तत्वात् जातानि धनानि। रेखापुरात् स्वपुरस्थप्रागपरदिगवस्थित्या ऋणधनत्वमवगन्तव्यम्। यस्मिन्वर्षे शुध्यंक एकविंशतिमारभ्य त्रिंशत्पर्यन्तं समायाति तस्मिन्वर्षेऽधिमासो ज्ञेयः।

तद्यथा—इष्टशके १५५२ एतन्मध्येपुस्तकीयशके १५४४ शोधितशेषं ८ शेषादधस्थातिथिः २८ शकादधस्थातिथिः २७ योगः ५५ त्रिंशत्तष्टेशेषं २५ अस्मिन्वर्षेऽधिमासोज्ञेयः। संक्रमणवशात्मासोज्ञेयः। यस्मिन्मासेसंक्रान्तिर्न भवति स अधिमासः।

उदाहरणक्रमोलिख्यते—इष्टशकः १५५१ एतन्मध्येपुस्तकीयशकः १५४४ शोधितः शेषं ७ पुस्तकीय-शकादधःस्थांकः २७।५।२६।४५ शेषादधस्थांकः १७।१।२१।५२ अनयोर्योगे जातं १४।६।४८।३७ इदं देशान्तर-पलैः ४७ सहितं जातं वर्षादौ तिथ्यादिकं १४।६।४९।२४ एवंचैत्रशुक्लचतुर्दशी शुक्रवारमारभ्य वर्षप्रवृत्तिः। शकादधःस्थवल्ली ५४।३६।३४ शेषादधःस्थवल्ली ४६।२८।१० अनयोर्योगे जाता वर्षादौ वल्ली ४१।४।४४ एवंकृता इति, इदंवारादिकंवल्लीसहितं पंचविंशतिधा स्थाप्यम्। अथानुक्रमेणतत्तत्पक्षस्थतिथिगुच्छो-योज्यःतद्यथा :—

प्रथमस्थाने शून्यकोष्ठकाधःस्थंवारादिकंयोज्यं ०।०।० तदधस्थावल्ली ०।०।० वल्लीषु योज्या। एवं द्वितीयस्थाने प्रथमकोष्ठकाधःस्थंवारादिकं ०।४५।३६ योज्यःतदधस्थावल्ली ३२।८।२३ वल्लीयोज्या, एवमग्रेपि। एवंकृतेसति तत्तत्पक्षादौ तत्तद्वारादि भवति तथाकृतेजातं प्रथमंपक्षस्थंवारादिकं ६।४९।२४ वल्ली ४१।४।४९द्वितीयपक्षस्थंवारादिकं ०।३५।१० वल्ली १३।१३।१३ तृतीयपक्षस्थवारादिकं १।१९।५६ वल्ली ४५।२०।१० एवमग्रेपि चतुर्विंशतिपक्षाः भवन्ति। अधिमासश्चेत्षट्विंशतिपक्षाः भवन्ति। इतिनियामकत्वादत्र एकस्थानमधिकम्। किमर्थमुक्तमितिचेदुच्यते। इष्टवर्षादिमारभ्य द्वादशमासान्ते अधिमासश्चेत्त्रयो-दशमासान्ते वर्षसमाप्तिर्भवति। अस्माद्वितीयदिवसे, अग्रिमसौरवर्षप्रवृत्तिर्न भवति किन्तु एकादशदिनान्तरे भवति। इतिकारणादेकपक्षस्य चालनमन्तरास्तद्दिवसज्ञानार्थमधिकमुक्तम्। अनया रीत्या प्रतिवर्षमेकादश-तिथिवृद्धिः। अनया रीत्या एकादशदिनवृद्ध्या तृतीये वर्षे अधिमासो न भवति। अथतत्तत्पक्षस्थवारादौ तत्तत्पक्षचालनानि रहितानि तानि कार्याणि कुतः चालनस्य ऋणत्वात्। तत्तत्पक्षादिस्थवल्लीषु वल्लीस्थ-चालनानि धनानि कार्याणि चालनस्य धनत्वात्। तद्यथा :—

प्रतिपत्ते पंचदश कोष्ठकाः कार्याः। तत्र प्रथमकोष्ठकस्थतिथिवारेषुएकोयोज्यः। तद्यथा। प्रथमकोष्ठ-कस्थतिथिवारौ तावेव तयोर्मध्ये-एकोयुक्तः कार्यः द्वितीयकोष्ठस्थतिथिवारौ भवतः। एवं द्वितीयकोष्ठस्थतिथि-वारमध्ये-एकोयुक्तः तृतीयकोष्ठस्थतिथिवारौ भवत एवमग्रेपि। प्रथमकोष्ठस्थवारादिमध्ये अयं घट्यादि-चालनाङ्को ०।५७।३६ घटीस्थाने रहितः कार्यः तद्वितीयकोष्ठस्थघट्यादिकं भवति। प्रथमकोष्ठे यथास्थितमेव। एवमग्रेपि। तथा प्रथमको ष्ठकस्थवल्लीयथास्थितैव। तन्मध्ये चालनाङ्को २।८।३३।३२ योजितः। द्वितीयकोष्ठ-स्थावल्ली भवति। एवमग्रेपि। एवंकृतेसति अन्तिमकोष्ठस्थवारादिकं तेनैव चालकेन रहितसत् द्वितीयपक्षस्थ-वारादिकतुल्यं भवति। तदाशुद्धयोयंक्रमः, अन्यथा अशुद्धः। एवंवल्ली। उदाहरणं—प्रथमपक्षस्थवारादिकं

१४।६।४९।२४ तिथौवारे च-एकोयुक्तः १५।० घटी ४९।५०।२४ एतन्मध्येचालनांको ०।५७।३० रहितः जातं द्वितीयकोष्ठस्थंवारादिकं १५।०।४८।२६।५४ एवंप्रथमपक्षस्थवल्ली ४१।४।४९ मध्ये चालनाङ्को २।८।३३।३२ युक्तः जाताद्वितीयावल्ली ४३ १३।१२।३२ एवमग्रेपि। तथाकृते जातम्। एवंकृते द्वितीयपक्षस्थे तिथ्यादि-तुल्यं षोडशकोष्ठकस्थतिथ्यादिकं जातम्। अथवल्यां य ऊर्ध्वांकोभवति तत्तुल्यंतिथिसौरमासस्य कोष्ठको-ग्राह्यः वल्लीस्थोर्ध्वांकादधःस्थायाघटिका भवति। तन्यूनंतदासन्नतिर्यक्पंक्तिस्थ घटिकायोतत्कोष्ठकादधःस्थ घटिकाभिः सहान्तरंकार्यम्। तद्धनर्णसंज्ञकं भवति। तदा अधःस्थघटीमध्येशुद्धंतदाधनसंज्ञकसान्तरं भवति। अन्यथा ऋणसंज्ञकं भवति। यदाचतुःपञ्चाशत्तिर्यक्पंक्तौघटीकादिकं फलंगृहीतं तदा तदधोघटिकाया अभावात् केनसह अन्तरकार्यमित्याह। तिर्यक्पंक्तौ शून्यघटिकायांवल्लीस्थोर्ध्वांक तुल्यकोष्ठकादधःस्थ घटिकाभिःसह् अन्तरं कायमिति। अत्रोदाहरणं—वल्ली ५३।५६।१० सह अन्तरं कार्यमिति। अत्रो-दाहरणं—वल्लो ५३।५६।१० त्रिपञ्चाशदधस्थतिर्यक्पंक्तौचतुःपञ्चाशद्घटिकायाः घट्यादिकं ८।५२

१४	१५	१	२	३	४	५	६	७	८	६	१०	११	१२	१३	१४
६	०	१	२	३	४	५	६	०	१	२	३	४	५	६	०
४६	४८	४७	४६	४५	४४	४३	४२	४१	४०	३६	३८	३७	३६	३५	३५
२४	२६	२८	३१	३३	३६	३८	४०	१२	४५	४८	५०	५२	५५	५७	०
०	२४	४८	१२	३६	०	२४	४८	१२	३६	०	२४	४८	१२	३६	०
४१	४३	४५	३७	४६	५१	५३	५६	२८	६	२	४	६	८	११	१३
.४	१३	२१	३०	३१	४७	५६	४	१३	२१	३०	३८	४७	५६	४	१३
४६	१२	५६	२६	३	३६	१०	४३	१७	५८	२४	५७	३१	४०	३८	१२
०	३२	४	३६	८	४०	१२	४४	१२	४८	२०	५२	२४	५६	३८	०

चतुः चतुःपंचाशतकोष्ठकादधस्थतिर्यक्पंक्तौ शून्यघटिकाया घट्यादिकं ९।५ अनयोरन्तरं १२ एवंबुद्धिमता-ज्ञेयम्। तदन्तरं तिर्यक्पंक्तौ या घटिकागृहीता सा वल्लीस्थघटिकामध्येशोध्याः शेषा या घटिकाः पलानि भवन्ति तेनान्तरेण गुण्यानि पश्चात् षट्भिर्भक्तो लब्धानि एतानिपूर्वस्थापितघटीमध्ये रहितानि सहितानि कार्याणि तद्यथा–यदाधनमंतरं तदा सहितानि, ऋणं तदा रहितानि कार्याणि। एवंकृते या घटिकाः पलानि च भवन्ति ताः कोष्ठकस्थघटीमध्ये योज्याः स्पष्टा घटिका भवन्ति। तिथिरेव वारमुल्लंध्य अग्रिमं वारं गच्छति तदा पूर्वस्मिन्वारे षष्टिघटिकात्मिका तिथिः स्थाप्या। यदैकवारे तिथिद्वयं भवेत्तदावमदिनं।

	१४	१५	१	२	३	४	५	६	७	७	८	६	१०	११	१२	१३
वा०	शु०	श०	सू०	चं०	मं०	बु०	बृ०	शु०	श०	सू०	चं०	मं०	बु०	वृ०	शु०	श०
घ०	५२	४८	४७	४६	४७	४६	५२	५६	६०	१	६	११	१६	२०	२३	२४
प०	२४	२५	३३	५२	३०	३१	३५	४४	०	३३	४६	५४	३१	३२	१	३४

तदा पूर्वोनापराकार्यो सा स्पष्टा भवेत्। अनया रीत्या नक्षत्रयोगसाधनं। अथ उदाहरणम्—प्रथमपक्षस्य प्रथमकोष्ठस्थावल्ली ४१।४।४९ अत्र वल्यामूर्ध्वाङ्के एकचत्वारिंशद्वर्तन्ते इतिकारणात् तिथिसौर भस्यैकचत्वारिंशकोष्ठकादधस्थवल्यां घटिकाचतुष्टयं वर्तते इतिकारणात् तिर्यक्पंक्तौ शून्यघटिकाया घट्यांकः ३।५ अयं अधस्थघटिकामध्ये २।५८ न शुध्यति अतः पूर्वघटिकामध्ये शोधितः ७ पलाद्य ऋणसंज्ञम्। अवान्तरे क्रियमाणे घटिस्थाने शून्यमेवावशिष्यते वल्लीस्थघटिकाशून्येन गुणिताः शून्यमिव जातं षट्भक्ते शून्यमितिकरणात्। घटिस्थाने शून्यत्यागः क्रियते पलं पलात्मकमन्तरं गृह्यते वल्लीस्थघटिकादिकं ४।४९ इदं तिर्यक्पंक्तिस्थशून्यघटीभीरहितंजातं ४।४९ इदंतरेणगुणितं ३३।४३ षट्भक्तंलब्धानिपलानि ५ एतानिपूर्वघटीमध्ये३।५ रहितानिजातानिघटीपलानि। ३।० एतानिपूर्वस्थापितप्रथमपक्षस्यप्रथमकोष्ठघटीपलमध्ये ४९।२४। युतानि जातानि चैत्रशुद्ध १४ भृगौ घटीपलानि। ५२।२४ एवमग्रेपि बोध्यं तथाकृते जातः प्रथमः पक्षः एतदुदाहरणो परिगणकेनगणितेक्रियमाणेयत्रापि अंकमध्ये अतरंपततितर्हिममनदोषः अस्माभिः शुद्धपुस्तकोपपरकृतमस्ति। इष्ट शकमध्ये १५५१ पुस्तकीयशके १५४४ शोधिते शेषं ७ शकादधस्थांकः २४।५।९।३२ शेषादधस्थांकः १६।२।६।२३ अनयोर्योगेजातं ४०।७।१६।१ देशांतरपलैः ४७ सहितं ४०।७।१६।४८ ऊर्ध्वाङ्कें सप्तविंशतिभिस्तष्टेजातं १३ तदधः सप्ततष्टेजातं ०। एवंजातं १३।०।१६।४८ वर्षादौ तिथ्यादिकं। यस्मिन्दिने तिथ्यारम्भो भवति तस्मिन्नेवदिने नक्षत्रयोगारम्भइतिव्याप्तिर्नास्ति। तद्दिनात् पूर्वापरदिनेवा भवति। चैत्रशुक्ल १५ शनौहस्तनक्षत्रप्रवृत्तिः। शकादधस्थावल्ली ५३।५५।२१ शेषादधस्थावल्ली ४८।५।९ योगः४२।०।३० जातानक्षत्रवल्ली इदं नक्षत्रादिकंवल्लीसहितं चतुर्दशस्थाने स्थाप्यम्। अधिमासश्चेत्पंचदशस्थानेस्थाप्यम्। अनुक्रमेण तत्तत्पक्षस्यनक्षत्रगुच्छायोज्याः। तद्यथा—प्रथमस्थानेशून्यकोष्ठकादधस्थंयोज्यम्। द्वितीयेप्रथमम्। एवमग्रेपि। तदधस्थवल्लीषुयोज्या। एवंकृते जातंप्रथमपक्षस्थंवारादिकं ०।१६।४८ द्वितीयपक्षस्थं ६।३६।५८ प्रथमवल्ली ४२।०।३० द्वितीयवल्ली ४१।३१।५७ एवमग्रेपि। अथतत्तत्पक्षादिषुः वारादौ तत्तत्पक्षचालनानिसहितानिकार्याणि। वल्लीषुचालनानि धनानिकार्याणिप्रतिपक्षसमं विंशतिकोष्ठकाः। तत्रप्रथमकोष्ठेप्रथमकोष्ठस्थनक्षत्रादिकंस्थाप्यं। तदधस्थातत्तत्पक्षवल्ली स्थाप्या। तदनन्तरंप्रथमकोष्ठस्थ नक्षत्रादिकं कोष्ठस्थ नक्षत्रवारौ भवतः। एवमग्रेपि। तथा प्रथमकोष्ठस्थ घटिका यथास्थिता एव। तन्मध्ये अयं घट्यादिश्चालनांको ०।४४।४८ युक्तः सत् द्वितीयकोष्ठं घट्यादिकं भवति। तथा प्रथमकोष्ठस्थावल्ली- यथास्थितैव। तन्मध्येऽयंघट्यादिचालनांको २।१३।१६ योजितः सन् द्वितीयकोष्ठस्थावल्ली भवति। एवमग्रेपि।

उदाहरणं—प्रथमकोष्ठस्थनक्षत्रादिकं १३।०।१६।४८। वारेण एकोयुक्तः। नक्षत्रे एकोयुक्तः। १४ घटीपलं १६।४८ एतन्मध्ये चालनांको ०।४४।४८ युक्तः जातंद्वितीयकोष्ठस्थं नक्षत्रादिकं १४।१।१७।३२।४८ एवं प्रथमपक्षस्थवल्ली ४२।०।३० मध्येचालनं २।१२।१५।३३ युक्तं जाताद्वितीयावल्ली ४४।१२।४५।३३ एवमग्रेपि प्रथमकोष्ठस्थावल्ली ४२।०।३० नक्षत्रसौरभस्यद्वितीयचत्वारिंशत्कोष्ठकादधस्थ शून्यघटिकायाघट्याद्यङ्काः १।४७ अधस्थाङ्कः १।४२ अन्तरं ५ ऋणमनेनवल्लीस्थ घटी ०।३० पलानिगुणितानि १५० षष्ट्याभक्तेपलानि २।३० षड्भिर्भक्तेपलानि ०।२५ पूर्वघटिकामध्ये १।४७ रहितानि १।४६।३५ एतानिपूर्वस्थापितप्रथमपक्षस्य प्रथमकोष्ठस्थ घटीपलमध्ये १६।४८ युतानिजाताघटिका १८।३५ एवं चैत्रशुक्ल १५ शनौहस्तनक्षत्रस्य घटिकादि। एवमग्रेपि॥ इतिनक्षत्रसाधनं।

अथ योगसाधनं—इष्टशाक १५५१ मध्ये पुस्तकीयशके १५४४ शोधिते शेषं ७ शकादधस्थांकः २४।५।११।५१ शेषादधस्थांकः १६।२।५।९ शकादधस्थावल्ली ५३।५६।३८ शेषादधस्थावल्ली ४८।२।२८

वारादिकयोगेजातं ४०।७।१७।० देशान्तरपलैः सहितैः ४०।७।१७।४७ ऊर्ध्वांकेसप्त- विंशतितष्टेजातं १३।७।१७।४७ वारेषुसप्ततष्टेजातेपूर्णम्। वल्लीयोगः ४१।५९।६ योगादिकंवल्लीसहितंचतुर्दशस्थानेस्थाप्यम्। अधिमासश्चेत्पंचदशस्थानेस्थाप्यम् । अथानुक्रमेण तत्तत्पक्षस्थयोगगुच्छायोज्याः । तद्यथा—प्रथमस्थानेशून्य-कोष्ठकादधस्थवारादिकं ०।०।० योजितेजातं ०।१७।४७ वल्लीषुयोजितावल्ली ४१ ५९।३६ एवं द्वितीयकोष्ठ-प्रथमकोष्ठस्थंवारादिकं ४ २७।२४ योजितं ४।४५।११ वल्ली ५५।२६।२५ वल्लीषुयोजिताजातावल्ली ३७।२६।१ एवमग्रेऽपि। प्रथमस्थयोगादिकं १३।०।१७।४७ योगस्थानेएकोयुक्तः वारे एको युक्तः घटीपलमध्ये १७।४७ घट्यादिश्चालनांको ३।२५।४६ रहितः जातंद्वितीयकोष्ठकस्थंयोगादिकं १४।१ १ ।२१।१५ एवं प्रथमपक्षस्थ-वल्लीमध्येचालनांको २ ३।१३।१८ योजितः जाता द्वितीयकोष्ठस्थावल्ली ४४।२।११ ८ एवमग्रेपि। प्रथम-जोष्ठस्थावल्ली ४१ ५६।६ योगसौरभस्यैकचत्वारिंशत्कोष्ठकादधस्थचतुः पञ्चाशतघटिकाया घट्यांकः १।४२ अधस्थांकः १।३७ अंतरंऋणेनानेन वल्लीस्थ घटीपलानि ५५।६ गुणितानि षट्भक्तेलब्धपलानि ४।१५ एतानिपूर्वघटिकामध्ये १।४२ रहितानि १।३८ जातानि घटीपलानि एतानि पूर्वस्थापित घटींपलमध्येयु-तानि जातानि चैत्रशुक्ल १५ शनौव्याघातयोगघटी १९ पलानि २५ एवमग्रेपितथाकृतेजातः प्रथमपक्षः।

अथेष्ट तिथ्यादिसाधनं—वर्षमध्येयस्मिन्मासेयातिथिरपेक्ष्यतेतत्तिथिपर्यन्तं चैत्रादिप्रतिपदमारभ्य-तिथयः स्थाप्याः। ताः वर्षादितिथ्याहीनाः कार्याः शेषाः सौरवर्षादेरिष्टदिनपर्यन्ततिथयोभवन्ति। अभीष्ट-नक्षत्रयोगसाधनेतास्तिथयोद्विष्ठाः एकत्रषट्त्रिंशदंशेनहीनाः। अपरत्रद्वाविंशांशेन युताः कार्याः। निरवय-वेनोभयत्रापिवर्षादितोनक्षत्रयोगाभवन्ति। तिथयः पञ्चदश भक्ताः कार्याः। नक्षत्रयोगौसप्तविंशतिभक्ताः फलं निरवयवंयाह्यंतेतिथिनक्षत्रयोगकोष्ठाः स्युः एतत्कोष्ठकादधस्थस्वस्वगुच्छस्थवारादिकंस्थाप्यं। वल्लीच-स्थाप्या। वारादिकमत्रवर्षादिस्थदेशांतरसंस्कृतंवारादिकं योज्यंवल्लीषुवल्लीयोज्या। तदनन्तरं वारस्थानेपञ्च-दशभागाशेषास्तिथयोयुक्ताः कार्याः वारस्थानेसप्तविंशत्तष्टंकार्यं एवं नक्षत्रयोगौ वर्षादिस्थनक्षत्रयोगाभ्यां-सहितौकार्यौ। सप्तविंशत्यधिकेसप्तविंशतितष्टंकार्यमभीष्टनक्षत्रयोगौभवतः। अभीष्टतिथिस्तुज्ञायते एवेतिन-तदानयनेयत्नोविधेयः। वारादिकमध्येस्वस्ववर्षादिस्थादेशान्तर संस्कृतं वारादिकंयोज्यंवल्लीषुवल्लीयोज्या। वारस्थानेशेषानक्षत्रयोगा युताः कार्याः वारस्थाने सप्तभिस्तष्टंकार्यं। तदनन्तरं स्वस्वचालकाःशेषतिथ्यादि-नागुण्याः। चालकश्चेद्धनस्तदाघटिस्थाने युक्ताः कार्याः। ऋणेरहिताः यदातुशुद्ध्यति तदा वारादिकाग्राह्याः। एवमेव वल्ली। एवंतिथिनक्षत्रयोगानां वारादिकं भवति। वल्लीसहितम्। अस्मात्प्राग्वत् स्वस्वसौरभो-परिघटिकाः साध्याः अभीष्टतिथ्यादिः स्पष्टाघटिका भवंति। उदाहरणम्—शके १५५१ वैशाखकृष्ण १० घट्याद्यानयनंतत्रचैत्रशुद्ध १ प्रतिपदमारभ्यदशमीपर्यन्तमिष्ट तिथयः २५ वर्षादितिथ्या १४ हीना ११ पञ्चदश-भिर्भक्ताः फलं शेषं ११ तिथिगुच्छस्थंशून्यकोष्ठकादधःस्थंवारादिकं ०।०।० वल्ली च ०।०।० इदं वर्षादिकंवारा-दिभिः ६।४९।२४ युतंवारस्थानेशेषतिथि ११ भिर्युक्तंसप्ततष्टंजातंवारादिकं। ३।४९।२४ वल्ली योजिता ४१।४।४९ चालकः ०।२७।३६ शेषतिथिभिर्गुणितः १०।३३ इदंघटीस्थानेरहितंजातं ३।३८।५१ वल्लीस्थाने चालकः २८।३३।३२ शेषतिथिभिर्गुणित. ३३ ३४ अनेनवल्लीयुक्ताजातावल्ली ४।३८।५२ आभ्यांप्राग्वज्ज्ञातावैशाखकृष्ण १० बुधे घटिका १६ पलानि ३१ एताः पूर्वानीततुल्याजाता अस्यांतिथौ नक्षत्रयोगानयनं। शेष तिथयः ११ स्वषट्त्रिंशदंशेनरहिता जाताः ११ पुनस्ताएवतिथयः स्वद्वाविंशत्यंशेनयुक्ता ११ जातौ नक्षत्रयोगौ। अनयो-रूर्ध्वसप्तविंशतितष्टं फलं शून्यकोष्ठकःनक्षत्रगुच्छस्थंशून्यकोष्ठकादधस्थंवारादि ०।० ० योगगुच्छशून्यकोष्ठस्थं-वारादि। ०।०।० वल्ली ०।०।० नक्षत्रादिकवारादिकंवारस्थानेशेषनक्षत्रैर्युतं। ११।०।० इदंवर्षादिस्थकोष्ठस्थ-

नक्षत्रवारादिभि ०।१६।४८ युतं सप्तनष्टवारादिकं ४।१६।४८ वल्लीषुवल्लीयुक्ता ४२।०।३० जातावल्ली ४२।०।३० एवमेवजातयोगवारादिकं १७।४७ वल्ली ४१ ५६।६ नक्षत्रचालकः ४४।४८ शेषनक्षत्रैर्गुणितः ८।१३ इदं घटीस्थानेयुतं जातं नक्षत्रं वारादिकं ४।२५।१ वल्लींचालकः २।१२।१६।३३ शेष नक्षत्रैर्गुणितः २।।१५।२।३ अनेनवल्लीयुताजातावल्ली ६।१५।३२ पूर्वानीतनक्षत्रमध्येवर्षादिस्थनक्षत्रं १३ युतंजातं २४ शततारका नक्षत्रं। एवंप्राग्वज्जातं। वैशाषकृष्णैकादश्यांगुरौशततारकानक्षत्रस्यघटिका ३ पलानि ११ अथ योगवारादिस्थचालकः। ३।२५।४६ शेषैर्गुणितः ३७।४३।३६ इदंघटीस्थानेरहितं जातं ३ ४०।४ वल्लीस्थचालकः २।३।१३।८ शेषंयोगै र्गुणितः ३२।३५।२४।२८ अनेनवल्लीयुताजाता ४।३४ ३० पूर्वानीतयोगमध्ये ११ वर्षादिस्थ योगेयुक्तेजातः भुक्तयोगः २४ एवंजातंवैशाखकृष्णदशम्यां बुधेयोगघटिकाः १२ पलानि १० कदाचिन्नक्षत्रयोगौ—अग्रिमतिथौ गच्छतः तदाशेषनक्षत्रयोगयोरेकोरहितः कार्यः।

अथ संक्रान्तिमहानक्षत्रसाधनम्—इष्टशक १५५१ मध्येपुस्तकीयशके १५४४ शोधितेशेषं ७ शकादधस्थंवारादिकं। ५।४१।१७ शेषादधस्थं वारादिकं १।४८।४० अनयोर्योगेजातं ०।२९।५७ देशांतरपलैः। ४७ सहितं जातोब्दपः ०।३०।४४ अयंद्वादशस्थाप्यः क्रमेणमेषादिद्वादशसंक्रान्तिक्षेपैर्युतः कार्यः द्वादश-संक्रान्तयः स्युः अब्दपमध्येमेषसंक्रान्तिक्षेपको ०।०।० युक्तः जातामेषसंक्रान्तिः ०।३०।४४ एवं चैत्रशुक्लपूर्ण-मास्यांशनौ आसुघटीषुमेषसंक्रान्तिप्रवेशः। वृषसंक्रान्तिक्षेपकः २।५७।१ अब्दपमध्येयुतोजातः ३।२७।४५ भौमवारे आसुघटीषु २७।४५ वृषसंक्रान्तिप्रवेशः एवं मिथुनादिष्वपि। एवमब्दपः सप्तविंशतिस्थानेस्थाप्यः। अश्विन्यादिसप्तविंशतिक्षेपकैर्युक्तः कार्यः तत्तन्नक्षत्रप्रवेशो भवति। अश्विनी ध्रुवांक २६।०।०।० मध्ये ०।३०।४४ युक्तः अश्विनीप्रवेशः एवमग्रेपि। चैत्रशुद्ध १५ शनौ आसुघटीषु ३०।४४ अश्विनीप्रवेशः। संक्रमात्संक्रम-स्त्रिंशदिनांते प्रायोभवति। नक्षत्रान्तरंनक्षत्रप्रवेशश्चतुर्दशादिनान्तरे भवति। अथस्त्रिंशदिनान्तेचतुर्दशदिनान्त-रेस्वस्ववारक्रमेणराशिनक्षत्रप्रवेशौलेख्यौ।

अथसायनसंक्रमणसाधनम्—यस्मिनराशौ सायनसंक्रान्तिरपेक्ष्यतेतद्राशावयनांशाः शोध्याः सरा-श्यादिः सूर्योभवति। तदासन्नपञ्चांगावार्धस्थसूर्येणसहान्तरंकार्यं। तस्यकलाः कार्याः सूर्यगत्याभाज्याः फलंदि-नाद्यंग्राह्यंतदवधिस्थवारादौसहितंरहितंकार्यं। तद्यथा—यथावधिस्थ सूर्योदूनोभवति तदासहितमधिकेरहितं-कार्य मिति। तस्मिन्वारे सायनसंक्रान्ति घटिका भवन्ति।

उदाहरणं—शकः १५५१ सायनवृषसंक्रान्ति साध्यते। अयनांशाः १६।५७ एकराशिमध्येशोधितः जातः सूर्यः ०।१३।३ अस्यासन्नो वैशाषकृष्ण ३ शनावध्यर्कः ०।१३।३८।३९ अनयोरन्तरंकलाभिः ५८।१२ भक्ताः फलं दिनाद्यं ०।३६।४५। अर्वाधस्थवारादिकमध्ये ०।२९।२७ रहितंजातावैशाषकृष्ण १२ भृगौसा-यनवृषसंक्रान्तिघटिकाः ५२।४२ अस्याः प्रशंसा। तास्वेवपूण्यातिशयंमुनींद्रावशिष्ठमुख्याजगदुर्महांतः। सद्यु-क्तिमुक्तं च विलोक्यतेदः परंनचैतद्व्यवहारयोग्यम्। इतिदिवाकरपद्यम्।

अथग्रहसाधनम्—

इष्टशकमध्येपुस्तकीयशके शोधितेयच्छेषंतत्प्रमितकोष्ठकादधस्थांकमध्येपुस्तकीयशकादधस्थांकोयोजि-तस्तदधस्थवारयोर्योगःकार्योंख्यादिवर्तमानोवारो ज्ञेयः। एवंकृते इष्टवर्षात प्रथमवर्षेफाल्गुनीपौर्णमास-युक्तायामावास्या तस्यामागतवासरे अर्धरात्रसमये ग्रहवल्ली भवति। कदाचितपूर्वं परदिनेवा भवति यस्मिन्-दिने—आगतवासरोभवति तस्मिन्दिनेग्रहवल्लीज्ञेया। अत्रवारस्यैवप्राधान्यं। तदनंतरं एतद्वल्लीस्वदिन-

मारभ्यमेषसंक्रान्तिदिन पर्यन्तं अन्तरालदिवसैर्वल्लीचतुर्थांकोयुतः कार्यः सा मेषसंक्रान्तावर्धरात्र समये ग्रह-वल्ली भवति। मेषसंक्रान्ति वल्लीचतुर्थाङ्के सप्तयोज्याः सप्तदि नान्तरे वल्ली भवति। एवमग्रेपि। अव-धिस्थवल्ल्युपरिमध्याः स्पष्टाग्रहाः साध्याः। अथमेषसंक्रान्तिदिवसेमध्यमाग्रहाः साध्याः। देशान्तरबीज-संस्कृताःकार्याः। तेषुसप्तगुणिताः स्वस्वमध्यगतिर्योज्या। तेअग्रिमावधिस्थाभवन्ति। एवमग्रेपि। अथात्र-यस्मिन्मासेयस्मिन्पक्षेग्रहचालनमपेक्ष्यते। तत्तत्पक्षमासचालनानिप्रथमग्रहदिनवल्यांयोज्यानि। एवंकृते-तत्पक्षेमासेग्रहवल्ली भवति। यास्मन्दिने ग्रहसाधनमपेक्षते तावद्भिर्दिनैर्वल्लीचतुर्थाङ्कोयुक्तः तावद्भिर्दिनै-वारोयुक्तः सप्ततष्टः कार्यः। एवं कृते इष्टवारः सएववल्लीस्थोवार आयाति तदाभीष्टदिने ग्रहवल्ली भवति तदाभीष्टवारो नायातितदादिनद्वयेनएकेनदिनेनवावल्ली चतुर्थांकोयुक्तः कार्यः यथाभीष्टोवारः आयातितथैव-कार्यः। पक्षवल्लीसंस्कारश्चैत्रशुद्धप्रतिपदमारभ्यवर्तते। एवंग्रहवल्लीपूर्वमेवचतुर्दश्यां अमावास्यायां वा आयाति। इतिकारणात्। अयं संस्कार उक्तः।

अथ वारानयनं—ग्रहवल्लीषष्ट्यासवर्णिताकार्याअहर्गणोभवति। पश्चात्सप्ततष्टेयच्छेषं तत्प्रमित-शुक्रवारमारभ्यवर्तमानोवारोज्ञेयः। अत्रोदाहरणं—शके १५३४ वैशाखशुक्ल १५ ग्रहसाधनं क्रियते। इष्ट-शक १५३४ मध्येपुस्तकीयशके १५१४ शोधितेशेषं २० शेषादधस्थांकः ०।२।२।४ वारः २ शकादधस्थांकः ७।५६।८।५२ वारः ५ अनयोर्योगः ७।५८।१०।५६ वारयोर्योगः ७ सप्ततष्ट शनिवारेः जातावल्ली ७।५८। १०।५६ एतन्मध्येवैशाख शुद्ध पौर्णमासीस्थ पक्षवल्ली ०।०।०।४४ युताजातावैशाखशुद्ध १५ अर्धरात्रसमये-ग्रहवल्ली ७।५८।११।४१ वारेषु वारो २ युक्तः २ जातः सोमवारः। इयंग्रहवल्लीरव्यादिग्रहसाधने—
—उपयुक्ता अत्रेदमवधेयं। प्रथमतश्चैत्रादिनिकटग्रहदिनवल्लीतोवक्ष्यमाणरीत्या सूर्यः साध्यः स यदि अपेक्षितार्क समस्तदाशुद्धा अन्यथा अशुद्धा। यदिचार्क एकराशिन्यूनाधिकः तदावल्लीतत्रांकेरवरामायोज्याः शोध्याः परेपिक्रमा द्वयंहेयंवा। उदाहरणं—इष्टशकः १५५८ उक्तवज्जातावल्ली ८।०।३६।३७ वारश्च ५ वल्लीस्थ सूर्यः १०।२६।४५।०२ अपेक्षितमीनार्कादून इतिवल्ली चतुर्थांकेरवरामायोजिताजातावल्ली ८।०।३७।७ द्वययोजना-द्वारश्च० एतद्वल्लीस्थसूर्यः ११।१५।२६।२७ अपेक्षितार्कसमइति १५५८ अस्मिन् चैत्रादितः प्रागमायांवल्लीशनौ जाताशुद्धाएवमधिकत्वेद्रष्टव्यम्। अतएवोक्तंदिवाकरेण। अपेक्षितार्कादिति।

अथग्रहसाधनं—स्वस्ववाटिकायांवल्यांयश्चतुर्थांकः तत्प्रमितकोष्ठकस्थाश्चत्वारोंकाः स्थाप्याः। तदनन्तरंवल्लीतृतीयांकतुल्यकोष्ठकस्थप्रथमाङ्कं विहाय चत्वारोंकास्थाप्याः। ततोवल्लीद्वितीयांकतुल्यकोष्ठस्थो-र्ध्वांकद्वयं विहायचत्वारोंकाः स्थाप्याः। ततोवल्लीप्रथमांकतुल्यकोष्ठस्थोर्ध्वांकत्रयंविहायचत्वारोंकास्थाप्याः। ऊर्ध्वांकास्त्याज्याः। ततस्तेषांयोगः कार्यः। ऊर्ध्वांक षष्ट्यधिकः षष्टि तष्टः कार्यः साग्रहवल्लीघट्यादिर्भवति। रविचन्द्रादिवल्लीभिन्नालेख्याः। अग्रेउपयुक्तत्वात्। तदनन्तरंग्रहवल्लीषट्गुण्या अंशादिकं स्यात्। अंशास्त्रिं-शद्भक्ताराशयो भवन्ति। एवमर्धरात्रिसमये राश्यादिग्रहाभवन्ति। चन्द्रोच्चबुधभृगुबल्लीनांविशेषः। उक्त-वच्चन्द्रोच्चवल्लीकार्या। तस्याउर्ध्वांकेपंचचत्वारिंशद्युक्ताकार्या तदनन्तरंचन्द्रवल्लीमध्येशोध्यातदनन्तरंषड्गुणिता कार्याचंद्रोच्चंभवति। यदावल्लीमध्येवल्लीनशुध्यतितदोर्ध्वांषष्ट्युताकार्या। बुधशुक्रोच्चबल्लीमध्ये शोध्या तदनन्तरं षड्गुणिताकार्याबुधशुक्रयोः शीघ्रोच्चं भवति। एवं ग्रहसाधनांतेरेखा स्वदेशान्तरयोजनघ्नीत्यादिना देशान्तर संस्कारः कार्यः। अर्धरात्रेचराभावाच्चरसंस्कारो न भवति। उदाहरणं—शके १५३४ वैशाखशुक्ल १५ वल्ली ७।५८।१८।४० रविवाटिकायांचत्वारिंशत्कोष्ठकादधस्थांकः ६।३४।१४।२७ एकादशकोष्टकस्थाङ्काद्यङ्कं विहायचत्वारोंकाः ४८।२४।५८।३६ अष्टपंचाशत्कोष्ठकादधस्थांकः ३८।५८।२०।३४ सप्तमकोष्ठकादधस्थांकः

३१।५२।८।१४ चतुर्णांयोगे जातारविवल्ली १२५।४९।४१।५४ ऊर्ध्वांकेषष्टि-तष्टे शेषं ५।४९।४१।५४ इदं षट्गुणंजाताअंशा ३५।५८।११।२४ अंशस्त्रिशद्भक्ताः लब्धंराशयः एवं राश्याद्योरविः १।४।५८।११ चंद्रवल्ली ३५।२।१२।७ चंद्रः ७।०।१३।१२ चंद्रोच्चवल्ली ५७।४१।६।३७ ऊर्ध्वांकेशरवेद ४५ युक्ताजाता ४२।४१।६।३७ इदं चन्द्रवल्लीमध्ये ३५।२।१२।७ रहितंजातं ५२।२१।५।३० उच्चः १०।१४।६।३३ भौम वल्ली ४९।५३।३६।१८ भौम. ९।२९।२१।३८ बुधोच्चवल्ली ५१।३४।३३।५४ रविवल्ली ५।४९।४१।५४ मध्येशुद्धाजाता १४।१५।८।० इदंषड्गुणंत्रिंशद्भक्तंजातंबुधशीघ्रोच्चं २।२५।३०।४८ गुरुवल्ली २१।४३।३१।५८ गुरुः ४।१०।२१।१२ शुक्रोच्च वल्ली ४३।१९।३०।१९ रविवल्लीमध्येशोधिता २२।३०।११।३५ पूर्ववज्जातंशुक्रशिघ्रोच्चं ४।१५।११।९ शनिवल्ली ५४।१७।४१।२ शनिः १०।२५।४६।६ केतुवल्ली ३७।३०।४४।४१ केतुः ७।१५।४।२८ अयंराशिषट्कयुक्तोजाता-राहु १।१५।४।२८ अथवाकेतुवल्यामूर्ध्वांके त्रिंश ३० युक्ताराहुवल्ली भवति काश्यांदेशान्तरयोजनानि ६४ ऋणानि

"रेखास्वदेशान्तरयोजनघ्नीगतिर्ग्रहस्याभ्रगजैर्विभक्ता।
लब्धाविलिप्ताखचरेविधेयाप्राच्यामृणंपश्चिमतो धनंच ॥"

इत्यादिना देशान्तरकलाः ४७ ऋणदेशान्तरसंस्कृतोरविः १।४।५७।२४ चंद्रः ७।०।२।४० उच्चं १०।१४।६।२८ भौमः ९।२९।२१।१३ बुधोच्यं २।२५।२७।३१ गुरुः ४।१०।२१।८ शुक्रोच्चं ४।१४।५९।५२ शनिः १०।२५।४६।५ राहुः १।१५।४।३० इष्टशकमध्ये १५३४ नवसप्तेन्दुरामाः ३१७९ योजिताजातंकलिगतं ४७१३ कलिगतस्यसहस्रांशों १००० शादि ४।४२।४६ शनिबीजधनं। एतत्त्र्यंशे १।३४।१५ सहितंजातंबुधोच्चधनं-तस्यधनं ६।१७।१ शनिबीजत्र्यंशेनरहितंजातं ३।८।३१ ऋणंगुरोः शनिवीज शुक्रोच्चऋणं ४।४२।४६ बीजसंस्कृतंबुधोच्चं ३।१।४४।३२ गुरुः ४।७।१२।३७ शुक्रोच्चं ४।१०।१७।७ शनिः ११।०।२८।५१। अथकश्चिद्-विशेषउच्यते। यदाग्रहदिनवल्ली अङ्कचतुष्टय मध्येशून्यमायातितदाग्रहसाधनं कथंकार्यं। यतो ग्रहवाटिकायां-शून्यकोष्ठकोनास्ति। आदौशून्यकोष्ठमस्तीतिचेत्तत्रशून्यस्थानेषष्टिर्वर्तते। इतिकारणात् शून्यकोष्ठकस्या-भावाच्छून्यस्थानेफलाभावः। तत्र अंकत्रययोगेग्रहवल्ली भवति। वाटिकायामंकवाटिकायामङ्कग्रहणेशून्यस्थाने-एकैकमङ्कं विहाय योऽयमित्यनुवर्तते। यदाशून्यस्थाने षष्ठिः स्थाप्यते तदाशून्यकोष्ठकादधस्थांकोग्राह्यः। एवमंक चतुष्टययोगोग्रहवल्ली भवति। एवं प्रकारद्वयेतुल्ये भवतिवल्ल्यौ। कल्पितावल्ली ७।५८।०।४० रविवाटिकायांचत्वारिंशत्कोष्ठकादधः-स्थांकः ६।३४।१४।२७ अष्टपञ्चाशत् कोष्ठकादधःस्थाङ्कः ६।३८।५८।२०। ३४ सप्तकोष्ठकादधस्थांकः ३१।५२।८।१४ एषांयोगे जातावल्ली १७।२४।४३।१५ अथवा ग्रहदिनवल्ली ७।५७। ५०।४० चत्वारिंशत्कोष्ठकादधस्थांकः ६।३४।१४।२७ शून्यकोष्ठकादधस्थांकः ५१।२१।४१।४४ सप्त पञ्चाशत-कोष्ठकादधस्थाङ्कः ४७।३६।३८।४९ सप्तकोष्ठकादधस्थांकः ३१।५२।८।१४ एषांयोगेजातासैव रविवल्ली १७।२४।४३।१५ एवंसर्वग्रहेषुशून्यस्थानेशून्यकोष्ठकस्थफलंचेद्गृह्यते तदा इयंवल्लीसंपद्यते ८।४६।२४।५९ तस्मा-दियमशुद्धा एतदुत्तरत्ररवेर्विसंवादात्। यदावल्यामंकत्रयेशून्यं। तदाऊर्ध्वांक प्रमितकोष्ठकस्थ अधस्थांकमध्ये अंकत्रयंत्यक्त्वाचत्वारोंकाग्राह्याः सैवग्रहवल्ली अथरवीन्दोः स्पष्टीकरणम् मन्दोच्चंरविमध्यशोध्यंमंदकेन्द्रः भवति तस्य भुजांशांशाः कार्याः। भुजांशतुल्यकोष्ठकादधःस्थभागाद्यं फलं ग्राह्यं। तदग्रिमकोष्ठकस्थफलेन सहातरंकार्यं। तेनांतरेणभुजाशादधस्थकलाद्यंगुण्यंषष्ठ्याभक्तं फलं कलाद्यंग्राह्यं एताःकलाः पूर्वस्थापित-फलमध्येयुक्ता कार्याः। अग्रिमकोष्ठकस्याधिकत्वात्। अंशाद्यमंदफलं भवति। मेषादि षट्के ऋणं। तुलादि षट्के धनगते संस्कृतो रविः स्पष्टो भवति।

अथ गतिसाधनम्—फलादधःस्थं कलाद्यं गतिफलं ग्राह्यं तदग्रिमान्तरेण भुजांशादधस्थं कलाद्यं गुण्यं षष्ट्या भाज्यं फलं कलाद्यं ग्राह्यं एताःकलाः पूर्वस्थापितगतिकलामध्येसहितारहिताः कार्या अग्रिमकोष्टकवशात्। इदं स्वकीयमध्यगतौकर्कादिकेन्द्रंधनं, मकरादौऋणं, स स्पष्टागतिः। अनयारीत्याचन्द्रस्यस्पष्टीकरणं। रवेर्मन्दोच्चं २।१७।१७।० रविमध्ये पात्यरविमन्दकेन्द्रं १०।१७।४०।२४ अस्य भुजांशाः ४२।१९।३६ द्विचत्वारिंशत्कोष्टकादधस्थंफलं १।२८।३ अग्रिमकोष्टस्थंफलं १।२९।४६ अन्तरं १।४३ अनेनकलाद्यं १९।३६ गुणितं ३३।३८ षष्टिभक्तं फलं कलाद्यं ०।३३।३८ इदं पूर्वस्थापितफलमध्ये १।२८।३ सहितंजातं रवेर्मन्दफलं १।२८।३६ तुलादिकेन्द्रत्वाधनमनेनसंस्कृतोजातः स्पष्टः सूर्यः १।६।२६।० कलादधःस्थंगतिफलं १।३८ अग्रिमान्तरेणविकलात्मकेनकलाद्यं १९।३६ गुणितं ३५।१२ षष्टिभक्तं अग्रिमाङ्कस्यन्यूनत्वात्गतिफलमध्ये १।३८ रहितं जातं गतिफलं १।३७ मकरादिकेन्द्रत्वात्ऋणंअनेनमध्यमागतिः ५९।८ संस्कृताजाता स्पष्टागतिः ५७।३१ अथचन्द्रस्यस्पष्टीकरणं—चन्द्रोच्चंचंद्रमध्येशोधितं उच्चं १०।१०।६।२८ चन्द्रः ७।०।२।४० जातंचन्द्रस्यमन्दकेन्द्रं ८।१५।५६।१२ उक्तवन्मन्दफलं धनं ४।५३।५३ अनेनसंस्कृतोजातः स्पष्टचन्द्रः ७।४।५६।३३ गतिफलं १६।५७ धनं अनेन संस्कृतामध्यागतिः ७।१०।३५ जातास्पष्टाचन्द्रस्यगतिः ८०७।३२।

अथ भौमादीनांस्पष्टीकरणम्—तत्र गुरुभौमशनीनांशीघ्रोच्चंमध्यमोरविः। बुधशुक्रयोः पूर्वसाधितमस्ति। योमध्यमोरविः स एव बुधशुक्रौ। ग्रहमध्येहीनंशीघ्रोच्चं कार्यंशीघ्रकेन्द्रं भवति। षट्भादिकंद्वादशराशिभ्यः शोध्यंषट्भान्न्यूनं यथास्थितमेव तस्यांशाः कार्या अंशप्रमितकोष्टकादधस्थशीघ्रफलं भागाद्यंस्थाप्यं। अग्रिमान्तरेणकलाद्यंगुण्यं षष्टिभक्तंफलं कलाद्यं ग्राह्यं। तत्फलं पूर्वस्थापितफलमध्येरहितंसहितंकार्यं। अग्रिमकोष्ठवशात्, तदंशाद्यं शीघ्रफलंभवति।

मेषादौ ऋणं। तुलादौ धनं—अस्यार्धेनमध्यमः संस्कृतः कार्यः। शीघ्रफलार्द्ध संस्कृतोभवति। तदनन्तरमेतन्मध्येमन्दोच्चंशोध्यंमन्दकेन्द्रं भवति। षड्भाधिकंद्वादशराशिभ्यः शोध्यंतस्यांशः कार्यः तत्प्रमितकोष्ठकादधस्थमंशाद्यमयफलंग्राह्यं। अग्रिमान्तरेणकलाद्यंगुण्यं। षष्टिभक्तंकलाद्यं तत्पूर्वस्थापित फलमध्ये रहितंसहितंकार्यमग्रिमकोष्टवशात्। तन्मंदफलं भवति इदं यथागतं धनर्णं सम्पूर्णमध्यग्रहेदेयंसमंदः स्पष्टोभवति। इदं मंदफलंपूर्वशीघ्रकेन्द्रमध्येधनंचेद्धनं, ऋणंचेदृणं देयं। द्वितीयशीघ्रफल साधने शिघ्रकेन्द्रं भवति। अथवा शीघ्रोच्चं मन्दस्पष्टमध्येशोध्यं शीघ्रकेन्द्रं भवति। अस्मात्पूर्ववत्शीघ्रफलंकार्यं। तन्मन्दस्पष्टग्रहेदेयंस्पष्टग्रहो भवति।

अथ गतिसाधनं—मन्दफलसाधनेयन्मन्दाकान्तरं तेन स्वीयागतिर्गुणयेत्। फलंकलाद्यंतत्स्वगतौ मकरादिमन्दकेन्द्रे ऋणं कर्कादौ धनंकार्यं। सा मन्दस्पष्टागतिर्भवेत्। अनेनोनाशीघ्रोच्चगतिः शीघ्रगतिर्भवति। अन्तिमशीघ्रफलसाधनमच्छीघ्रांकान्तरंतेनान्तरेणशीघ्रगतिर्गुण्या षष्ट्याभाज्याफलं अग्रिमकोष्ठकवशान्मन्दस्पष्टगतौ धनर्णंकार्यं सा स्पष्टागतिर्भवेत्। विपरीतशोधनेन वक्रागतिः। उदाहरणं :—भौममध्ये ९।२९।२१।१३ एतस्यशीघ्रोच्चं रविः १।४।५७।२४ शोधितः जातंशीघ्रकेन्द्रं ८।२४।२३।४९ षड्भाधिकं अतश्चक्रात् १२ शोधितं ३।५।३६।११ अस्यांशाः ९५।३६।११ शीघ्रफलंधनं ३४।२२।३८ अस्यार्धेन १७।११।१९ संस्कृतोभौमः १०।१६।३२।३२ एतन्मध्ये मन्दोच्चं ४।१० शोधितं जातंमन्दकेन्द्रं ६।६।३२।३३ मन्दफलंधनं १।२९।३६ मध्यंभौमेदत्तंजातोमन्दस्पष्टोभौमः १०।०।५०।४९ तन्मन्दफलं प्रथमं शीघ्रकेन्द्रस्य धनंदत्तं जातं द्वितीयशीघ्रकेन्द्रं ८।२५।५३।२५ अस्मातप्राग्वत् शीघ्रफलं धनं ३३।५८।४५ शीघ्रफलसंस्कृतोमन्दफलस्पष्टोजातः स्पष्टोभौमः ११।४।४९।३४ मन्दांकान्तरेण १४ गतिर्गुणिता ४४।०।४ षष्टिभक्ता फलंकर्कादिकेन्द्रत्वात्धनं ७।२०

अनेनसंस्कृतामध्यगतिः ३१।२६ जातामन्दस्पष्टागतिः ३८।४६ अनेनोनाशीघ्रोच्चगतिः ५९।८ जाताशीघ्रकेन्द्रगतिः २०।२२ इयंशीघ्रांकांतरेण १६ गुणिता ३२५।५२ षष्टिभक्ताफलं ५।२५ अनेनसंस्कृतामन्दस्पष्टागतिर्जातास्पष्टागतिः ४४।११ इति भौमस्पष्टीकरणम्।

अथ बुधस्पष्टीकरणं—शीघ्रकेन्द्रे १०।३।१२।५२ शीघ्रफलार्धं ७।१०।६ संस्कृतोबुधः १।१२।७।३० मन्दोच्चं ७।१० रहितं मन्दकेन्द्रं ६।२।७।३० मन्दफलं धनं ०।१०।३६ मध्यग्रहेदत्तं मन्दःस्पष्टं १।५।८।० तन्मन्दफलं प्रथमशीघ्रकेन्द्रे दत्तं जातं द्वितीयशीघ्रकेन्द्रं १०।३।२३।२८ अस्मात्पुनः शीघ्रफलं धनं १४।१७।५५ मन्दस्पष्टोदत्तंजातस्पष्टोबुधः १।१९।२५।५५।

मन्दांकान्तरेणगतिर्गुणिताः २१।५।४० षष्टिभक्ताफलं ४।५५ मकरादिकेन्द्रत्वाद्दणंमन्दस्पष्टागतिः ५४।१३ अनेनोनाशीघ्रोच्चगतिर्जीवाशीघ्रकेन्द्रगतिः १९।१९ इयंशीघ्रांकान्तरेण १३ गुणिता २४८७।७ इष्टिभक्ताः फलं ४१।२७ अनेन संस्कृताजातास्पष्टागतिः ९५।४० इतिबुधस्पष्टीकरणम्॥

अथ गुरुस्पष्टीकरणं—गुरुमध्ये ४।७।१२।३७ सूर्यः १।४।५७।२४ शोधितः शीघ्रकेन्द्रः ३।२।१५।१३ फलार्धंऋणं ५।४१।२२ संस्कृतोगुरुः ४।१।३१।१५ मंदोच्चेन ५।२० हीनंमन्दकेन्द्रं १०।११।३१।१५ फन्दफलं घनं ३।४३।२६ मन्दस्पष्टोगुरुः ४।१०।५६।३ मन्दफलं प्रथमशीघ्रकेन्द्रेदत्तंजातंद्वितीयंशीघ्रकेन्द्रं ३।५।५८।३९ तत् शीघ्रफलंऋणं ११।२८।५८ स्पष्टोगुरुः ३।२८।२७।३५। मन्दांकान्तरेण ३ गति ५ निघ्ना १५ षष्टिभक्ताफलं ०।१५ फलं मकरादित्वाद्दणं ४।४५ जातामन्दस्पष्टागतिः। अनेनोनाशीघ्रोच्चगतिः ५९।८ जाताशीघ्रकेन्द्रगतिः ५४।२३ इयं शीघ्रांकान्तरेणगुणिता ५४।२३ षष्टिभक्ताफलं मन्दस्पष्टगतौ धनं जातास्पष्टागतिः ५।३९ इति गुरुस्पष्टीकरणम्।

अथ शुक्रस्पष्टीकरणं—शुक्रशीघ्रकेन्द्रं ८।२४।४०।१७ फलार्धंऋणं १८।५०।७ संस्कृतः शुक्रः १।२३।४७ ३१ मन्दोच्चं २।२० मन्दकेन्द्रं ११।३।४७।३१ मन्दफलं धनं ०।४९।२५ मन्दःस्पष्टः शुक्रः १।५।४६।४९ शीघ्रकेन्द्रं ८।२५।२९।४३ शीघ्रफलं धनं ४७।२४।६ स्पष्टः शुक्रः २।१३।१०।५५ मन्दांकान्तरेण २ मन्दस्पष्टागतिः ५७।१० अनेनोनाशीघ्रागतिः ९६।८ जाता शीघ्रकेन्द्रगतिः ३८।५८ शीघ्रांकान्तरं २० शीघ्रगतिफलं धनं १२।५९ स्पष्टागतिः ७०।९ इतिशुक्रः।

अथ शनिस्पष्टीकरणं—शीघकेन्द्रं ९।२५।३१।२७ शीघ्रफलार्धधनं २।४३।३।२७ संस्कृतः शनिः ११।३। २ १८ मन्दोच्चं ७।२६ मन्दकेन्द्रं ३।७।१२।१८ मन्दफलंऋणं ७।३८।४६ मन्दः स्पष्टः १०।२२।५०।५ शीघ्रकेन्द्रं ९।१७।५ ।४१ शीघ्रफलं धनं ५।४८।२२ स्पष्टः शनिः १०।२८।३८।२७ मन्दांकान्तरं १ मन्दस्पष्टगतिः २।२ शीघ्रकेन्द्रगतिः ५७।६ शीघ्रांकान्तरंधनं २।५१ स्पष्टागतिः ४।५३ अथसौरभोपरिकिञ्चित्स्थूलं रव्यादिग्रहाणांस्पष्टीकरणं तत्रादौ अभीष्टदिवसे उक्तवत्ग्रहवल्लीसाध्या तदुपरिस्वस्ववाटिकायां घटिकादिर्ग्रहः कार्यः॥ तस्य कन्द इतिसंज्ञाकार्या तदनन्तरंदेशान्तरसंस्कारः कार्यः। सा तथा। यस्य ग्रहस्यकलात्मकं देशान्तरं तत्तद्भक्तं कलात्मकेन पलेन घटिकादिग्रहस्य पलस्थाने धनं चेत् सहितं ऋणंचेत्तदा रहितं कार्यं। अस्य विकलात्मकं देशान्तरस्तद्भक्तंकलात्मकेन पलेन घटिकादिग्रहस्य पलस्थाने धनं चेत्सहितं ऋणंचेत्तदा रहितं कार्यम्। यस्य विकलात्मकदेशान्तरंतत्तषट्भक्तं विपलात्मकेन विपलस्थाने सहितरहितंकार्या। तदनन्तरमब्दबीजसंस्कारः कार्यः। तद्यथा—अंशादिबीजषट्भिर्भाज्यम्। तेन घटिकादिग्रहः संस्कार्य इति आदौ कृत्वा तत्स्पष्टोकरणं। तत्रादौ सूर्यस्य सूर्यकन्दस्य घटीतुल्यं रविसौरभस्थं कोष्टकादधस्थं घटिकादिफलं ग्राह्यं, अग्रिमान्तरेण शेषं गुणनीयं। षष्टिभाज्यं कलात्मकेन पूर्वस्थापितघटिकादिपलस्थाने युतंकार्यं। अग्रिमस्या-

धिकत्वात्। एवंकृतेघट्यादिस्पष्टोरविर्भवति। तदनन्तरंषड्गुणः कार्यः, अंशादिर्भवति। अंशास्त्रिंशभक्ता-राशयो भवन्ति। उदाहरणं—पूर्वानीतेरविकन्दः ५।४९।४१।५४ देशान्तरंऋणं ७।५० संस्कृतः ५।४९।३४।४ पंचकोष्ठकादधस्थघटिकादिफलं ५।१६।१२ अग्रिमान्तरेण ५८।१७ शेषं ४९।३४।४ गुणितं २८८८ षष्टिभक्तं फलं ४८।८ अनेन घटिकाद्यं ६।४।२० युतंषड्गुणितंजातोराश्यादिस्पष्टोर्कः १।६।२६।०।

अथ गतिसाधनं—गतगम्यकोष्ठान्तर एकेनान्तरितंकार्यं। तस्य कलाः कार्याः गतगम्यान्तरोपक्षयारूपाधिकत्वेमध्यगतौ रहिता। ये न्यूनेयुताः कार्या रवेः स्पष्टागतिर्भवति। उदाहरणं—गतगम्यान्तरं ०।५८।१७ एकेनान्तरितं ०।१।४३ कलीकृतंगतगम्यान्तरापेक्षयारूपाधिकत्वात्। अनेन हीना रविमध्य गतिः ५७।२५।

अथ चन्द्रस्पष्टीकरणं—ऊर्ध्वांके पंचचत्वारिंशद्युताजाताचन्द्रोच्चवल्ली तस्य लता इतिसंज्ञाकार्यातल्लतोपरिचन्द्रसौरभोपरिचन्द्रसौरभस्य सानुपातघटिकादिफलं ग्राह्यं। तच्चन्द्रकन्देषु योज्यं तदनन्तरं षड्गुणितं कार्यं स स्पष्टचन्द्रोभवति। सर्वत्रानुपाते षष्टिर्भाजकः। उदाहरणं—लता ४२।४१।६।३७ देशान्तरं ०।५० संस्कृतांलता ४२।४१।५।४७ चन्द्रसौरभस्थंद्विचत्वारिंशत्कोष्टकादधस्थं सानुपातं घटिकादिफलं ०।४८।५।२८ चन्द्रकेन्द्रः ३५।२।१२।७ देशान्तरं १।४१।२० संस्कृतं ३१।१०।२६।४७ फलेन युक्तः ३५।२३।१५ षड्गुणितः स्पष्टचन्द्रः ७।४।५६।१९ अथगतिः—द्विचत्वारिंशत्कोष्टकादधःस्थंसानुपातघटिकादिचन्द्रगतेः फलं २।१४।३५ षड्गुणं जाता अंशाः १३।२७।३० षष्ट्यागुणिता स्पष्टाचन्द्रगतिः कलाद्या ८०७।३०।

अथ भौमस्पष्टीकरणं—भौमकन्दमध्ये रविकन्दःशोध्यः। यच्छेषं तस्य लतासंज्ञा कार्या। लतायाघटीप्रमितकोष्ठकादधःस्थं भौमसौरभस्थं सानुपातं घटिका फलं ग्राह्यं। तत्फलं भौमकन्देषुयोज्यं। तदुपकन्दसंज्ञकं भवति। उपकन्दोपरि उपकन्दस्थं सानुपातं घटिकादिफलंग्राह्यम्। तत्फलंभौमकन्दमध्ये योज्यंसुकन्दो भवति। लतामध्ये योज्यं सुलता भवति। सुलतोपरि सुलताफलं सानुपातं घट्यादिफलं ग्राह्यम्। तत्फलं सुकन्देषु योज्यं तदनन्तरं घटिस्थाने दशभि रहितंकार्यं। तन्मकरन्दसंज्ञकं भवति। तदनन्तरं षड्गुणितं भौमः स्पष्टो भवति। अनयारीत्या गुरुशन्योः स्पष्टीकरणं। बुधशुक्रयोः साधितांकचतुष्टययोगेघटिकादिकेन्द्रवल्ली सैव लता ज्ञेया। रविकन्द एव बुधशुक्रयोः कन्दौ-अनयोः स्पष्टीकरणं। रविकन्दः ५।४९।३४।४ भौमकन्दः ४९।५३।३६।१८ देशान्तरं ४।१० संस्कृतः ४९।५३।३२।८ एतन्मध्ये रविकन्दशोधिता जाता लता ४४।३।५८।४ लतोपरि प्राप्तं सौरभस्थंघटिकादिफलं ४१।१२।७ अग्रिमान्तरे ८।२८ अनुपातफलं ०।३३।३५ अनेन पूर्वफलं संस्कृतं ४१।११।३३।२५ इदं भौमकन्दमध्ये युतं जातोपकन्दः ३१।५।५।३३ एतदुपरि प्राप्तं उपकन्दफलं सानुपातं २।१४।५०।९ अनेनयुक्तो भौमकन्दः जातः सुकन्दः ५२।८।२६।२७ पुनः फलेन युता जाता सुलता ४६।१८।४८।१३ सुलतोपरिप्राप्तं सुवल्लीफलं १३।३९।४१।५५ अनेन सुकन्दोमुक्तः ६५।४८।४।१२ दशभिर्हीनोजातोमकरन्दः ५५।४८।४।१२ षड्गुणितः जातो राश्यादिः स्पष्टो भौमः ११।४।४०।२५।

अथ गतिसाधनं—भौमस्योपकंदफलयोर्गतगम्ययोरन्तरेण गतिर्गुणनीया। तन्मन्दफलं भवति। इदं मध्यगतौ गम्यस्याधिकत्वे युतं न्यूनत्वे ऋणं। सा मन्दस्पष्टागतिर्भवति। अनेनोनाशीघ्रकेन्द्रगतिः शीघ्रोच्चगतिर्भवति। इयं सुवल्लीफलान्तरेण गुण्या गतेः शीघ्रफलं भवति। तेन फलेन गतैस्यांकस्याधिकत्वे मन्दस्पष्टागतिर्भवति। अनयारीत्या बुधशुक्रशनीनां गतिसाधनं कार्यं। उदाहरणं—उपकंदफलयोरन्तरं ०।१३।२३ गतिः ३।२६ गुणिताजातंमन्दफलंरव्यांकस्याधिकत्वाद्धनं ७।०।४१ अनेन युता मध्यगतिः जाता मन्दस्पष्टा ३८।२७ अनेन रहिता शीघ्रोच्चगतिः ५९।८ जाताशीघ्रकेन्द्रगतिः २०।४१ इयं सुवल्लीफलान्तरेण ०।१६।५५ गुणिताजातं शीघ्रगतेः फलं एष्यांकस्य हीनत्वाद्धनं ५।४९।५३ अनेन युतामन्दस्पष्टा गतिः जाता स्पष्टा ४४।१७

अथ बुधस्पष्टीकरणं—लता ५१।३४।३३।५४ शीघ्रकेन्द्रगति प्रमाणेन देशान्तर २।२५।२४ संस्कृता ५१।३२।८।३० अनेन बुधकन्दः ५।४९।३४।४ युतोजात उपकन्दः ५७।२०।४२।३४ अस्मादुपकन्दफलं २।१।४६।३९ अनेन कन्दोयुक्तः जातः सुकन्दः ७।५१।२०।४३ लतायुता जाता सुलता ५१।३३।५५।९ सुवल्लीफलं १०।२३।६ २८ अनेन सुकन्दोयुक्तः १८।१४।२७।११ दशभिर्हीनोजातोमकरन्दः ८।१४।२७।११ षड्गुणितोजातोराश्यादिः स्पष्टोबुधः १।१९।२६।४३ उपकन्दकलयोरन्तरं ०।५।९ धनंमन्दस्पष्टागतिः ६४।१२ शीघ्रकेन्द्रगतिः १८।१।२१ सुबल्लीफलयोरन्तरं ऋणं ०।१२।४७ स्पष्टागतिः १०२ ५० ।

अथ गुरुस्पष्टीकरणं—रविकन्दः ५।४९।३४।४ गुरुकन्दः २१।४३।३१।५८ देशान्तरं ०।४० संस्कृत २१।४३।३१।१८ वीजऋणं ०।३१।२५।१० संस्कृत २१।१२।६।८ एतन्मध्ये रविकन्दः शोधितः जाता लता १५।२२।३२।४ सौरभोपरिफलं ३०।२९।४४।५१ अनेन गुरुकन्दोयुक्तः जात उपकन्दः ५१।४१।५०।५९ उपकन्दफलं २।३८।१।४९ अनेन कन्दोयुक्तो जातः सुकन्दः २३।५०।७।५६ सुलता १८।०।३३।५३ सुवल्लीफलं ६।५।१६।४४ अनेन सुकन्दोयुक्तः २९।५५।२४।४१ दशहीनोजातोमकरन्दः १९।५५।२४।४१ षड्गुणितोराश्यादिस्पष्टोगुरुः ३।२९।३२।२८ उपकन्दफलयोरन्तरं ऋणं ०।३।२२ मन्दस्पष्टागतिः ४।४४ शीघ्रकेन्द्रगतिः ५४।२४ सुवल्लीफलयोरन्तरं ऋणं ०।२०।२९ स्पष्टागतिः ५।१० ।

अथ भृगुस्पष्टीकरणं—शुक्रलता ४३।१९।३०।१९ देशान्तरं ४।५० संस्कृता ४३।१९।२५।२९ बीजंधनं ०।४७।७।४० संस्कृतालता ४४।६।३३।९ सौरभस्थंफलं ४९।३९।३३।८ अनेन शुक्रकन्दो ५।४९।३४।४ युक्तोजात उपकन्दः ५५।२९।७।१२ उपकन्दफलं २।८।१४।२७ सुकन्दः ७।५७।४८ ३१ सुलता ४६।१४।४७।३६ सुवल्लीफलं १४।१३।२७।५१ अनेन सुकन्दोयुक्तः ६४।४६।२८।० मकरन्दः ५४।४६।२८।० षड्गुणः स्पष्टः शनिः १०।२८।३८।४८ उपकन्दफलयोरन्तरंधनं ०।०।४४ मन्दस्पष्टागतिः ५७ ७ सुवल्लफलयोरन्तरंऋणं ०।०।२० स्पष्टागतिः ४।१४ ।

अथायनांशसाधनं—इष्टशकः कुर्यामाब्धिहीनाः कार्याः तदनन्तरं स्वदशमांशेन हीनः कार्यः। स्पष्ट्या भाज्यः। अयनांशाभवन्ति। उदाहरणं—इष्टशकः १५३४ अनेन ४२१ हीनः १११३ अयं द्विष्ठः अस्य दशमांशेन १११।१८ रहितः १००१।४२ षष्टिभक्ता जाता अयनांशाः १६।४१।४२ ।

अथ दिनमानसाधनं—स्पष्टः सूर्य अयनांशयुक्तः कार्यः तस्यांशाः षड्भिर्भाज्या लब्धिकोष्टकादधःस्थं घट्यादिफलंस्थाप्यं तद्दिनमानरूपं। अग्रिमकोष्टकान्तरेण शेषं गुण्यं। षड्भक्तानिलब्धानि पलानि। एतानि पूर्वस्थापितदिनमानफलस्थाने अग्रिमकोष्टकवशात् सहितानि रहितानि वा कार्याणि। तद्दिनमानं भवेत्। उदाहरणं—सूर्यः १।६।२६।० अयनांशैर्युक्तः १।२३।७।४२ अंशाः ५३।७।४२ षड्भिर्भक्ताफलं ८ एतत्तुल्यकोष्टकस्थंदिनमानं ३२।५४ अग्रिमान्तरेण १८ शेषं ५।७।४२ गुणितं ९२।१८।३६ षड्भिर्भक्तंलब्धपलानि १५ एतानि अग्रिमस्याधिकत्वात् पूर्वस्थापितदिनमान पलमध्ये युतं जातं दिनमानं ३३।९ ।

अथ प्रकारान्तरेण रवेः प्रतिराशिप्रत्यंशोपरिदिनमानसाधनं—स्पष्टांकस्थाप्यः। अत्रायनांशसंस्कारोनास्ति रवेर्यावतोराशयस्तदधोयावन्तोभागाः सन्ति ततुल्यराश्यंशसूर्योदधःस्थं दिनमानं ग्राह्यं। अग्रिमान्तरेण गुण्यं षष्ट्याभाज्यं। पलात्मकं लब्धं पलस्थाने अग्रिमकोष्टकवशात् रहितसहितं कार्यं तद्दिनमानं स्यात्। उदाहरणं-सूर्यः १।६।२६।० एतत्तुल्यसूर्योदधस्थंदिनमानं ३३।५ अग्रिमान्तरेण ३ शेषं २६ गुणितं ७८ षष्ट्या भक्तं फलं १ अनेन संस्कृतं जातं स्पष्टं दिनमानं ३३।६

अथ चन्द्रदर्शनम्—यस्मिन्मासे शुक्लप्रतिपदिचन्द्रदर्शनमवलोक्यते तस्मिन्मासि तद्दिने सूर्योयद्राशावस्तितद्राशिस्थः सूर्यस्तिर्यक्पंक्तौ यस्मिन् कोष्टके भवति स कोष्टकोग्राह्यः। तदनन्तरं यस्मिन् राशौ राहुरस्ति तद्राशिस्थौ राहु ऊर्ध्वपंक्तौ यस्मिन् कोष्टके भवति तत्कोष्टकादधस्तात् सूर्यकोष्टकाभिमुखीघटीग्राह्या। तदनन्तर अमावाश्यायाः विद्यमानघटिकास्ताः षष्टि घटिकामध्ये शोध्याः तदनन्तरं यच्छेषं भवति तद्दिनजं दिनमानं तन्मध्ये योज्यं। एवंकृते या घटिका भवन्ति ताः पूर्वस्थापितघटिभ्यश्चेदधिकास्तदा प्रतिपदिचन्द्रो दृश्यः न्यूने अदृश्यः। किन्तुद्वितीयायांदृश्यः। उदाहरणं—सूर्यः ४।२० राहुः १०।२ अत्र रविः ५ सिंहे कुंभेराहुः। अनयोः प्राप्तघटी ८२ अमावास्याः घटिकाः ११४० षष्टिमध्ये शोधिताः ५८।२० शेषं दिनमानेन युक्तं। ३१।२४ जाताः ८९।४४ एता आभ्य ८२ अधिका अतोत्र प्रतिपद्येव चन्द्रदर्शनम्।

अथभौमादीनां वक्रमार्गोदयास्तसाधनं—अन्तिम शीघ्रफलसाधने यच्छीघ्रकेन्द्रं तस्य चक्रशुद्धस्यांकाः कार्याः प्रोक्तांशानां इष्टशानां च साम्ये तस्मिन्नेवदिने वक्रादिकंस्यात्। न्यूनाधिके तद्दिवसानयनम—प्रोक्ते ष्टांशानामन्तरकलाः कार्याः शीघ्रकेन्द्रगत्या भाज्याः। लब्धं दिनघटी पलाद्यं ग्राह्यं प्रोक्तांशेभ्य इष्टकेन्द्रांशा अधिकास्तदालब्धेन अवधिस्थं वारादिकं रहितं कार्यं। तद्वारघटीपलेषु वक्राद्यं स्यात्। अस्तोदयाविति-दिवाकरपद्यं। अथभौमादीनां चरणगतिसाधनं। भपादेतिदिवाकरपद्यं। वैशाखशुक्ल ५ शनावधिःस्थो भौमः ३।२६।१।३९ आश्लेषा चतुर्थ चरणे भौमः ३।२६।४० अनयोरन्तरं कलाः ३८।२१ अवधिस्थ भौमगत्या १९।२३ भक्ताः फलं दिनादिकं १ ५८।११ इदमवधिस्थवारादौ ०।४६।३४ युतं २।४४।४५ भपादजं भौमात् अवधिस्तस्य न्यूनत्वात्। एवं वैशाख शुक्लसप्तम्यांसोमे सूर्योदयाद्गतघटीषु ४४ पलेषु ४५ तदा श्लेषाचतुर्थपादे भौमः।

अथचन्द्रग्रहणं—पूर्णिमान्ते यद्विद्यमानं नक्षत्रं तस्य गतैष्यघटिकायोगः कार्यः तत्तुल्यघटिकाधः स्थं चंद्रबिम्ब पातबिम्बंनाम भूभाबिम्बं ग्राह्यं। अग्रिमान्तरेण शेषफलादिगुण्यानि। षष्ट्याभक्तेन लब्धाङ्गुलैरग्रिमकोष्टकवशात् सहित रहितानि कार्याणि। अंगुलात्मकं चन्द्रबिम्बं। भूभाबिम्बं च भवति। अथ भूभायाः संस्कारः। पौर्णमास्यां यद्राशौ सूर्यसंक्रान्तिरस्ति तद्राश्यधःस्थमङ्गुलादिकं पातफलं स्थाप्यम्। अग्रिमान्तरेण सूर्यस्य भागाद्यं गुण्यं। त्रिंशताभाज्यंव्यंगुलात्मकफलेन अग्रिम कोष्टकवशाद्धीनान्वितं कार्य मनेन भूभायुता कार्या। सा स्पष्टा भवति पातफलं सदाधनं तदनन्तरं रविचन्द्रयोर्बिम्बयोर्योगार्धं कार्यं। तन्मानैक्य खण्डं भवति। तत्शरोनं कार्यं ग्रासो भवति। उदाहरणं-शकः १५३४ वैशाखशुद्ध १५ सोमे घटी ५४।४० अनुराधानक्षत्रस्य। गतैष्ययोगः ५८।३६ सूर्यः १।६।३०।३७ चन्द्रः ७।६।३४।३५ राहुः १।१४।१८।११ अष्टपञ्चाशतघटिकाधःस्थं चन्द्रबिम्बं ११ १० अग्रिमान्तरेण ११ शेषंगुणितं ३९६ षष्ट्या भक्तं फलेन संस्कृतं जातं चन्द्रबिम्बं ११।४ भूभाबिम्बं २८।१६ अनुपातपलेन २२ संस्कृतः २७।५४ वृषसंक्रान्ताधस्थं फलं ०।३१ अग्रिमान्तरेण ६ शेषंगुणितं ३४।३७ जातं ३९ त्रिंशद्भक्तं फलेन १ संस्कृतं ०।३२ अनेन भूभा युता जातास्पष्टा भूभा २८।२६ अनयोर्योगार्धंजातं मानैक्यखण्डं १९।४५।

अथ शरसाधनं—पर्वान्तकालीनः सपातश्चन्द्रः कार्यः। अथवा विराहुश्चन्द्रकार्यः। षडधिकश्चेद्भगणाद्विशोध्यः। न्यूनोयथास्थितएव। तस्यांशाः कार्याः लब्धप्रमितकोष्टकस्थः अंगुलाद्यः शरोग्राह्यः। अग्रिमान्तरेण शेषं गुण्यं षट्भक्तं लब्धांगुलैः संस्कार्यः अंगुलात्मकः शरो भवति। उदाहरणं—विराहुश्चन्द्रः तस्यांशाः १७।२।१६।२४ षड्भक्ताः फलं २८।१२।४३ शरः अनुपातफलेन ६।२७ संस्कृताजाताः शरांगुलादिः १२।६ अनेन रहितं मानैक्यखण्डंजातोग्रासः ७।३९ अथ स्थित्यानयनं—ग्रासांगुल प्रमितकोष्ठकादधः स्थास्थितिः

स्थाप्या अग्रिमान्तरेण त्र्यंगुलानि गुण्यानि षष्टिभक्तं लब्धपलैः सहिताः कार्याः घटिकादिस्थितिः स्यात्। उदाहरणं—ग्रासः ७।३९ स्थितिः ३।३५ अनुपातफलेन ७ सहिता जाता घटिकादिस्थितिः ३।४२ अन्यदवशिष्ट करणोक्तरीत्या साध्यम्। इतिचन्द्रग्रहणम्।

अथसूर्यग्रहणं—शकः १५३२ मार्गशीर्ष कृष्ण ३० बुधे घटी ११।५९ सूर्यः ८।५।२६।२० लग्नं ११।२। ५।३४ त्रिभोनं अमावास्यायत्संक्रान्तौ भवति तत्संक्रान्ति राश्यधस्थ सूर्यबिम्बं स्थाप्यं। अग्रिमान्तरेण सूर्यस्य भागाद्यं गुण्यं त्रिंशद्भक्तं अंगुलात्मकं फले अग्रिमकोष्टकवशाद्धीनान्वितं कार्यं। अंगुलाद्यं सूर्यबिम्बं भवति। उदाहरणं—धनुराशौ सूर्यबिम्बं ११।४४ आयातत्र्यंगुलैः संस्कृतंजातं रविबिम्बं ११।२४ अथ लम्बनं—त्रिभोनलग्नार्कान्तरांशाः ते यथा राशित्रयाल्पा भवन्ति तथा कार्याः। तदनन्तरं षड्भिर्भाज्याः लब्धप्रमित पञ्चदशाधःस्थघटिकादि लम्बनं ग्राह्यम्। अग्रिमान्तरेण शेषं गुण्यं षड्भिर्भाज्यं लब्ध पलैः सहितं घटिकादि लम्बनं स्यात्। सूर्यात् त्रिभोनलग्नेधिकेसति धनं। न्यूने ऋणं ज्ञेयम्। उदाहरणं—त्रिभोनलग्नार्कान्तराशाः ३ २०।४६ षड्भिर्लब्धंशून्यं। शून्यादधःस्थंघटिकादिलम्बनं ०।०।० अग्रिमान्तरेण २४ २५ शेषं ३।२०।४६ गुणितं ८१।८२।३ षड्भिर्भक्तलब्धं पलादिकैः १३।५८ सहितञ्जातङ्घटिकादिलम्बनं ०।१४ अन्यदवशिष्टं पूर्ववत्। एतत् पञ्चदशकोष्टकस्थलम्बनस्यांको परिग्रहणं स्थूलं। क्रान्तिसाधनमाह—सायन ग्रहस्य भुजांशाः कार्याः। षड्भिर्भाज्याः लब्धप्रमितकोष्ठकस्था घटिकाद्या क्रान्तिः स्थाप्या। लम्बनवदनुपातः कार्य तदनन्तरंषड्गुणिताः कार्याः भागादिक्रान्तिः स्यात्। उदाहरणं—सूर्यः ८।५।२६।२० अयनांशाः १६।३९।५४ सायनसूर्यः ८।२२।६।१४ अस्य भुजांशाः ८२।६।१४ षडभक्ताः लब्धं १३ घटिकादिक्रान्तिः ३।५४।२६ पलात्मकेनानुपातेन २।५४ सहिता ३।५७।२० षड्गुणिताजाता भागाद्याक्रान्तिः २३।४४ ग्रन्थकर्त्राएते पञ्चदशाकोष्टकस्था लम्बनस्थांकाः अन्ये पञ्चदशकोष्ठेषु विपरीता स्थापिताः। एवं त्रिंशत्कोष्ठेषुक्रान्त्यंकाजाताः। अस्योपरिक्रान्तिसाधनं। सायनग्रहः षड्भाधिकश्चेच्चक्राद्विशोध्यः तस्यांशाःकार्याः षड्भिर्भाज्याः लब्धकोष्टकस्थाघटिकादिक्रान्तिः। पूर्ववत्सानुपातात्प्राह्याः अत्रानुपातफलं अग्रिमकोष्टवशाद्धीनान्वितङ्कार्यं। इयं क्रान्ति पूर्वेण सह तुल्या। उदाहरणं—सायनसूर्यः ८।२२ ६।१४ भगण १२ च्युता ३।७।५२।४६ अंशाः ९७।५३।४६ षड्भक्ताः फलं १६ क्रान्तिः ३।५८।३६ अनुपातफलेन १।१६ रहिता षड्गुणिता सैव क्रान्तिः २३।४४ अथ सूक्ष्म क्रान्ति साधनम्—सायनग्रहस्य भुजांशप्रमित कोष्टकस्था भागाद्या क्रान्तिः स्थाप्या। अग्रिमान्तरेण कलाद्यं गुण्यं षष्ट्याभागेन कलात्मकेन फलेन सहितं कार्यं भागाद्याक्रान्तिः स्यात् २३।४४।५८ अथ शरसाधनं—सपात चन्द्रस्य। अथवा विराहुचन्द्रस्यभुजांशप्रमितकोष्ट कस्थः कलादिः शरो ग्राह्यः अग्रिमान्तरेण शेषंगुण्यं षष्ट्या भाज्यं विकलपात्मकेन फलेन सहितं कार्यं कलादिबाणः स्यात्। त्रिभिर्भाज्योङ्गुलादिः स्यात्। उदाहरणं—विराहुचन्द्रस्य भुजांशाः ७।४३।४६ शरः ३२।५२ अनुपातफलेन ३।२४ सहितोजातः कलादिः शरः ३६ १६ त्रिभिर्भक्तोजातोङ्गुलाद्यः शरः १२।५ अथोन्नतांशोपरि द्वादशाङ्गुलशंकोः छायासाधनं—उन्नतांशप्रमित कोष्ठाधस्थांका स्थाप्यं अग्रिमान्तरेण शेषं गुण्यं षष्ट्याभाज्यं फलेनाग्रिमकोष्टकवशात्सहितंरहितंकार्यम्। छाया भवति। अथाश्विन्यादीनां नक्षत्राणा मुदयमध्यास्तलग्नज्ञानं—अश्विन्युदयेमेषलग्नराश्यादि ०।१।२६।५२ रवेर्मध्यस्थित कर्कलग्नं राश्यादि। ३।१४।२६ अस्तमयेतुलालग्नं राश्यादि ६।१२।५८ एवं भरण्यादिषु ज्ञेयं। इति विश्वनाथविरचितं मकरन्दस्योदाहरणंम्।

अथ संवत्सराद्यानयनमाह—तत्रादौसम्बत्सरानयनमाह। "शकाद्वेन्दु १५१४ वियुक्शकोनग ७

गुणः शून्यांबरांशोद्धृतो ६०० । भाद्यं लब्धमिताब्दवेददहनाढ्य ३४ शाब्दभूपेंदुतः । दिग्भागाःसकलायुतं प्रभवतोब्दाः षष्ठि शेषाः स्मृताः शेषांशा रविभिर्हता दिनमुखं भेषार्कतः प्राग्भवेत् । १ ।'' उदाहरणं—शकः १५५६ अनेन १५१४ रहितः जाता गताब्दाः ४२ सप्तभिर्गुणिता २९४ शून्यांबरांगो ६०० दुधृतः फलं राश्यादि ०।१४।४२।० राशिस्थाने गताब्दः ४२ वेददहनाभ्यांयुतः ७६।१४।४२।० गताब्दयुतभूपेन्दुतः १५८ दिग्भागा १०।सकला १५।१८ युतं ७६।१४।५७।४८ ऊर्ध्वांकः षष्ट्यातष्टः शेषांकः १६ गतवत्सरोज्ञयः वर्तमानः सुभानुसंवत्सरः शेषं १४।५७।४८ द्वादशभिर्गुणितन्जातं दिनादिकं १७९।३३।३६ दिनस्थाने त्रिंशद्भक्तं जातं मासादिकं ५।२९।३३।३६ एभिर्मासादिकैर्वर्तमानवर्षस्थमेषसंक्रान्ति सकाशात् पूर्वप्रवृत्तः सुभानुवत्सरः इदं द्वादशमध्ये शोधितेशेषं ६।०।२६।२४ एवं वर्तमान तुलांशकः ०।२६।२४ यावत्सुभानुवत्सरः । तदनन्तरं-तारणाख्यः । एवं वर्षमध्ये द्वयोःफलं लेख्यं । दाक्षिणात्याः नर्मदायाः दक्षिणेभागे मनुजमानेन संवत्सर-प्रवृत्तिमाहुः । उक्तंच । ''नर्मदोत्तर भागेस्यगुरुमानेन वत्सरः नर्मदायाम्य भागेतु मनु मानाद्बुधैः स्मृत.'' तदानयनं ।

शालिवाहनशाकोर्कसंयुतः षष्टिहतप्रभव पूर्ववत्सरानुमानेन ।
अथ गुरुदयात् गुरुवर्षज्ञानमाहस्यादूर्जादिषु मासेषु वह्निभादिद्वयंद्वयं ॥

उपांत्यपञ्चमान्तेषु नक्षत्राणांत्रयंत्रयं ।
यस्मिन्नभ्युदितोजीवस्तन्नक्षत्राख्यवत्सरः ॥

तद्यथा । यस्मिन्समये गुरोरुदय तस्मिन्समये यस्मिन्नक्षत्रे गुरुस्तिष्ठति तन्नक्षत्रस्य यो मासः सगुरुवर्षसंज्ञकोज्ञेयः कृत्तिकारोहिणीस्थितोगुरुः सूर्यसानिध्यादुदयं प्राप्तस्तदा कार्तिकसंज्ञकं गुरुवर्षं ज्ञेयं । मृगार्द्रयो मार्गशीर्षं ० । पुनर्वसुपुष्ययोः पौष । श्लेषामघयोर्माघः । पूर्वोत्तरा हस्तेषुफाल्गुनः । चित्रास्वात्योश्चैत्रः । विशाखानुराधयोर्वैशाखं० । ज्येष्ठामूलयोर्ज्येष्ठसंज्ञं० । पूर्वोत्तराषाढ योराषाढ ० । हरिवासवयोः श्रावणं० । शततारका पूर्वाभाद्रपदोत्तराभाद्रपदासुभाद्रं । अंत्यदास्रयमानामाश्विनसं० । तत्र पंचमः फाल्गुनः अंत्यः आश्विनः उपांत्यो भाद्रपदस्तेषु प्रत्येकं नक्षत्रत्रययोगोज्ञातव्य । सूर्यसिद्धान्तवचनादस्तमय नक्षत्रादपि गुरुवर्ष ज्ञेयमिति । अत्रास्तमयोदयनक्षत्रमेकमेव बाहुल्यो न भवति । तथापि कदाचिद्विसंवादे उदयास्त भादिति उभयनक्षत्रोपादानादुभययुतानि मिश्रीभावेन वक्तव्यानि । गुरूदय दिनमारभ्योपक्रमइत्यहर्गणः । ''प्रशंसति-सहर्क्षेणसहितोयुगपद्गुरुः । तस्मात्कालादहश्यः स्यात्पूर्वस्याब्दः प्रवर्तते ।'' ऋक्ष पूर्व इति वचनात् । कार्तिकादयोगुरूदयादब्दा उदितदिवसात् । प्रभवादयस्तु मध्यमगुरुराशि भोगादिति विवेकः । वहुसंमतत्वात् । गुरूदयाद्गुरोरब्दविचारणात् कर्तव्येत्यर्थः । गुर्वब्दफलं गुरूदयादग्रिमगुरूदयपर्यन्तं ज्ञेयम् । यस्मिन्वर्षे गुरूदय पुनर्वसु नक्षत्रे गुरुस्तिष्ठति इति कारणात् इदं पौष्य संज्ञकं गुरुवर्षं तस्य फलं लेख्यं । अथ राजादिनिर्णयः ।

चैत्रादिमेषादि कुलीरतौलिमृगाख्यमार्द्राधनुरादिवाराः ।
राजा चमूपस्य रसाधिपाश्च स्युर्नीरसेशांबुधिधान्य नाथाः ॥१॥

प्रतिपदियदिचैत्रेशुक्लपक्षे भवेतां कथमपि यदिवारौद्वौतदाभूपतिः कः ।
प्रथमदिवसवारः कीर्तितो गर्गमुख्यैर्गुणवति सतिडिंभे राज्यभाग् ज्येष्ठएव ॥२॥

डिंभोबालः । पोतःपाकोर्भकोडिंभ इत्यभिधानात् । काम्बोजादिदेशेषुविशेष उक्तः ।

काबोजखार्जूरकिरातसिंधुदेशेषुबिल्वेष्वपिद रैषु ।
किंस्तुघ्नमध्याह्नगतोऽब्दपः स्यादन्येषुसूर्योदयगो दि(गीशः)नेशः ॥

अन्यच्च ।

प्रतिपद्दर्शसंधिश्च मध्याह्नात्पूर्वतोयदि ।
तदातद्दिनपोराजा परतश्चेत्परो भवेत् ॥

अत्र केचिच्चांद्रवर्षस्यप्रतिपदादितोदक्षिणे वर्षे प्रवेशात् तत्रत्यएववारोवर्षेश इत्याहुः पठंति च । फाल्गुनांतेकुहूराजेति । तदेतद्गुर्जरदेशेप्राचुर्येणवर्त्तते । दाक्षिणात्या औदयिकप्रतिपद्वारमेव राजानमाहुः । कश्यपः ।

चैत्रशुक्लाद्यदिवसेकिंस्तुघ्नेववकेथवा ।
अर्कोदये तु यो वारः सोऽब्दपः परिकीर्तितः ॥

चैत्रशुक्ल प्रतिपद्दिवसे यो वारः स राजा । मेषसंक्रान्तिदिवसे यो वारः स मन्त्री । कर्कसंक्रान्ति दिवसे यो वारः स सस्याधिपः । तुलासंक्रान्ति दिवसे यो वारः स रसाधिपः । मृगसंक्रान्ति दिवसे यो वारो स नीरसाधिपः । आर्द्राप्रवेशदिवसे यो वारः स मेघाधिपः । धनुःसंक्रान्तिदिवसे यो वारः स पश्चिमधान्याधिपः । अथवा ? तुलासंक्रान्तिदिवसे यो वारः स पश्चिमधान्याधिपः । एतेषां फलानिक्रमतोलेख्यानि । तदनन्तरं यस्यांतिथौयस्मिन्वारे यस्मिन्नक्षत्रे यस्मिन्योगे आर्द्राप्रवेशस्तत्फलानि लेख्यानि । दिवारात्रौ वा प्रवेशस्तत्फलंलेख्यं । अथ नवमेघानयनं ।

गताब्दानवभिस्तष्टाः शेषं हाराद्विशोधयेत् ।
ततश्चावर्त्तसंवर्तद्रोणपुष्करकीलकः ।
नीलश्चवरुणोवायुस्तमोमेधाः स्मृतानव ॥

अत्र गताब्दानयनं । युग्मचन्द्रशरच्चन्द्र विहीनाः शालिवाहनशकात् गताः समाः । उदाहरणं—शकः १५५६ अनेन १५१२ रहिता जाता गताब्दाः ४४ नवभिस्तष्टाः शेषं ८ हरात् शोधितं १ आवर्तसंज्ञकोमेषस्तत्फलं लेख्यं केचित्तु मेघ चतुष्टयमाहुस्तदानयनं च ।

त्रिभिर्गताब्दाः सहिताश्चतुर्भिः शेषं भवेदंबुपतिः क्रमेण ।
आवर्त संवर्तक पुष्कराश्च द्रोणाश्चतुर्थो मुनिभिः प्रदिष्टः ॥

अत्रापिपूर्ववद्गताब्दानयनं ।

आवर्तेछिन्नवृष्टिः स्यात्संवर्तेजलपूरिताः ।
पुष्करे मन्दवृष्टिः स्यात् द्रोणो वर्षति सर्वदा ॥

अथद्वादशनागानयनम्

गताद्वाद्विपुता सूर्यभक्तास्तत्रावशेषिताः। सबुद्बोनन्दसारीत्र कर्कोटक पृथुश्रवाः॥
वासुकिस्तत्तकश्चैवकंबलाश्वतरावुभौ । हेममाली नरेन्द्रश्च वज्रदंष्ट्रोवृषस्तथा॥

अत्रापि पूर्ववद्गताब्दाज्ञेयाः। उदाहरणं—गताब्दाः ४४ द्वियुता ४६ द्वादशभिस्तष्टाः शेषं १० नरेन्द्रसंज्ञको नागस्तत्फलम्।

